দুষ্প্রাপ্য

# বিধবা বিবাহ খণ্ডনং।

নবদ্বীপ নিবাসিনা

শ্রীশিবনাথ বিদ্যাবাচস্পতিনা

প্রণীতং।

শান্তিপুর হিতকরী-যন্ত্রে

প্রোপ্রাইটর শ্রীযুক্ত ভুবনমোহন চট্টোপাধ্যায়

দ্বারা মুদ্রিত।

সন ১২৯২ সাল।

RARITYA LIBRARY
৪৬১
4618

# বিজ্ঞাপনং।

আমি সাধারণের জ্ঞাপনার্থে যে বাঙ্গালা রচনা করা উচিত তদ্বিষয়ে যে নিবৃত্ত থাকিলাম তাহার কারণ লিখিতেছি পরাশরাদি বচনের তাৎপর্য্যাদি প্রকাশক বাঙ্গালা সহকারে কলিতে বিধবাবিবাহ নিষেধক বচন ও তাৎপর্য্য যুক্তি প্রভৃতির প্রকাশক সংস্কৃত বাক্যনিচয় ছাপাইতে হইলে অর্থব্যয় অধিক হয় এবং ঐ অর্থব্যয় করার সাহায্য লাভ কষ্ট সাধ্য বিবেচনায় কলিকালে বিধবাগণের পুনর্ব্বিবাহ যে কোন শাস্ত্রসিদ্ধ নহে তাহাই নানাপ্রকার যুক্তি প্রমাণাদি সহকারে কিবল সংস্কৃতে লিখিয়া ছাপাইতেছি মহোদয় পণ্ডিতগণ এই বিষয়টি বিশেষরূপে অবগত হইয়া সংস্কৃতানভিজ্ঞ তত্ত্ববুভুৎসুভদ্রগণকে জ্ঞাপন করেন এবং দেশহিতার্থে তাহা কর্ত্তব্য বিবেচনায় প্রার্থী যে ইহার মর্ম্ম সকলকে জ্ঞাত করুন।

নবদ্বীপ নিবসিনা শ্রীশিবনাথ বাচস্পতিনা।

প্রণীতং।

# বিধবার ধর্ম্ম-রক্ষা।

## বিধবা ধর্ম্ম-রক্ষাণং।

ঋতুস্নাতাতু যা নারী, ইত্যাদিনা বৈধব্য মূলীভূতং পাপং নির্দ্দিশ্য ওঘ বাতাহৃতং বীজং ইত্যনেন বীজি ক্ষেত্রিণো-র্মধ্যে ক্ষেত্রিণঃ ফলভাগিত্ব মুক্ত্বা ক্ষেত্রজাদি কতিবিধ পুত্র জ্ঞাপনং কৃত্বাপরস্ত্রিয়াং ভর্ত্তৃর্জীবন মরণ দশায়াং জায়মানয়োঃ পুত্রয়োঃ কুণ্ডগোলকেতি সংজ্ঞাদ্বয়ং বিধায় পরিবেদন দোষো-ৎপত্তিকারণং পরিবেদনদোষাভাবকারণঞ্চোক্ত্বা "নষ্টে মৃতে ইতি" বচনং পরাশরেণ লিখিতং। ইদানীং তত্তাৎ-পর্য্যং যুক্তিসঙ্গতং ব্যাখ্যানঞ্চ ক্রিয়তে। পতৌ নষ্টে, অনু-দ্দিষ্টে মৃতে লোকান্তরগতে, প্রব্রজিতে তৃতীয়াশ্রমগতে, পতিতে অর্থাৎ স্বর্গাদিপ্রতিবন্ধক দ্বাদশ বার্ষিকাপনেয় পাপযুক্তে, অন্যঃ পতির্বিধীয়তে। পতিঃ পতিকার্য্যং নিষেক-রূপং তৎকারী অন্যোবিধীয়তে বিধাতুং যুজ্যতে। নিয়ো-গোপক্রমে এতদ্বচনস্য লিখনা ন্নিয়োগ বিধায়কং এতদ্ব-চনং বাচ্যং। তথাসতি—কলিকালে, ন বিধবায়াঃ বিবাহঃ পরাশরেণ বিহিত ইতি প্রতীয়তে॥

এতদ্বচনস্য নিয়োগার্থকত্বে,ন কেনাপি বচনেন বিরোধঃ, নবান্যায় বিরুদ্ধতা। অর্থাৎ ঊঢ়ায়াঃ পুনরুদ্বাহমিত্যাদি কলিকালঘটিত বিবাহিতা পুনর্ব্বিবাহ নিষেধ বিধিনা “ নতু নামাপিগৃহ্নীয়াৎ পত্যৌ প্রেতে পরস্যতু,,। ন বিবাহ বিধাবুক্তং বিধবাবেদনং পুনঃ” ইত্যাদি মন্বাদিবচনেন সহবিরোধঃ। অন্যথা নষ্টেমৃত ইত্যনেন যদি “অন্যঃ পতিঃ কিংপাণিগ্রহণসংস্কর্ত্তা কর্ত্তব্য ” এবং ব্যাখ্যাক্রিয়তে। তদাপত্যুরনুদ্দেশে পত্যন্তর গ্রহনান্তরং অনুদ্দিষ্টস্য পত্যুঃ সমাগমে দ্বয়োঃ পত্যোরেকস্যাং ভার্য্যায়াং ভোগেচ্ছয়াবিবাদ প্রসঙ্গঃ। ঊঢ়ায়াঃ পুনরুদ্বাহমিত্যনেন বিরোধঃ পত্যুর্ম্মরণেচ মন্বাদিবচনেন সহ বিরোধঃ স্যাৎ। ঊঢ়ায়াঃ পতিমরণে পৌনর্ভবাতিরিক্তপাত্রেণ সহ পুনঃ সংস্কার সম্ভবে মনোস্তাদৃক্ বিশেষাভিধানং বিফলং স্যাৎ। এতাবদনন্ত দোষান পর্য্যালোচ্য সাগরোত্থিতং বিষং পাতুং যদিকশ্চিৎ ইচ্ছতি, তদাসপিবতু। বিষপানে যৎ পরিণাম ফলং তৎসর্ব্বৈর্জ্ঞায়তে কিন্তত্রবক্তব্য মিতি। এবঞ্চ পত্যুরনুদ্দেশস্থলে, অষ্টবর্ষাদিপ্রতীক্ষানন্তরং পতিবিধানে যদি পূর্ব্বপতিরায়াতি তদাপি বিবাদ প্রসক্ত্যা ন পরাশর বচনং পতিবিধায়কং নবাবর্ষপ্রতীক্ষাবোধক নারদসংহিতাবচনং পতিবিধায়কং নিয়োগার্থকমেব, অতঃ পতিবিধায়কতয়া পরাশর বচনব্যাখ্যানং। নারদসংহিতা বচনব্যাখ্যানঞ্চ সর্ব্বথাহেয়মিতি সুধীভির্ভাব্যং ন মূর্খৈরিত্যলমতিবিস্তরেণ। এতদ্বচনস্য নিয়োগার্থকত্বে ন পত্যন্তরমাশ্রিত্য ক্ষেত্রজ পুত্রকরণপ্রসক্তিঃ কলৌ

তন্নিষেধাৎ। সুতরাং এতৎ পরাশর বচনবিহিতং নানুষ্ঠেয়মেব। যদ্যেবমাপত্তিঃ ক্রিয়তে। কলৌ পরাশরস্মৃত ইতি সংস্মৃত্য পরাশরেণ যদভিহিতং তৎকলাববশ্যমনুষ্ঠেয়মিত্যাকারা, সা, আপত্তির্ন কথঞ্চিৎ সম্ভবতিঃ যথা পরাশরেণ ক্ষেত্রজাদি পুত্রবিধানেঽপি তৎ ক্ষেত্রজাদি পুত্রকরণাপত্তির্যথা নিষেধবশান্নিবার্য্যা, তথা পরাশরবিহিত নিয়োগাপত্তিরপি নিবার্য্যেতি॥

নষ্টেমৃত ইতিবচনে "পতিরন্যোবিধীয়ত" ইত্যস্য তাৎপর্য্য প্রকাশকব্যাখ্যানং পুনঃ ক্রিয়তে, পতিকরণস্য প্রয়োজনং সংস্কারঃ, পূর্ব্বপুরুষীয় পিণ্ডদানাদ্যপকার যোগ্য সন্তানোৎপাদনং ভার্য্যারক্ষণঞ্চ এয়াণাং প্রয়োজনানাং মধ্যে সংস্কাররূপং প্রয়োজনং আদ্য বিবাহেন সিদ্ধং। ভার্য্যারক্ষণঞ্চ পতিমরণাদিস্থলে পতিকুলমাশ্রিত্য শাস্ত্রেস্ত্রিয়াঃ কালক্ষপনমুক্তং, পতিকুলেন রক্ষণাদ্যসম্ভবে শাস্ত্রে পিতৃকুলেন রক্ষণাদ্যুক্ত, মতঃ কেবল বৈধ পুত্রোৎপাদনার্থং পতিরন্যোবিধীয়ত ইতি নির্দ্দিষ্ট মিতি বক্তব্যং, তথাসতি পরিশেষ ন্যায়েন পতিকার্য্যং শেষভূতং নিষেকরূপং,, তৎকরণযোগ্যো দেবরাদি রূপোন্যোবিধীয়তে পুত্রোৎপাদনার্থং নিযুজ্যত ইতি যাবৎ। এবঞ্চ আপদ্বশাৎ যদন্য পতিবিধানং, তদাপচ্ছব্দস্য বৈধ পুত্রাভাবপরত্বে যৌক্তিক পর্য্যালোচনসিদ্ধে সতি পতিরন্যোবিধীয়তে। এবং ব্যাখ্যানং নিয়োগোপক্রমসিদ্ধং যৌক্তিকং নির্ব্বিরোধিচ দৃশ্যতে। অপুনাচ নিয়োগনিষেধাৎ পতিরন্যোবিধীয়তে।

ইতি নিয়োগার্থকং পরাশরবচনং ন কলি নিষিদ্ধ ক্ষেত্রজ-পুত্রকরণায় প্রবর্ত্তয়তি। নবাসাগরোত্থিতবিষজ্বালাকুলিতৈর্ভ্রান্তৈরিব ঊঢ়ায়াঃ পুনরুদ্বাহং জ্যেষ্ঠাংশমিত্যাদি কলিনিষিদ্ধানন্তকার্য্যাণাং সর্ব্বমুণিসম্মতানাং মধ্যে কেবল মূঢ়ায়াঃ পুনরুদ্বাহরূপং কলিনিষিদ্ধং পরাশরবিহিত মিতি ভ্রমরহিতৈরস্মাভিঃ প্রকৃতবিদ্যাকরব্যাসরূপ বিদ্যাসাগরোত্থিত বিধবা পুনর্ব্বিবাহ নিষেধ বিধি পালনামৃতং পীত্বানরক গমন রূপানরণাদ্ভয়ং নাপদ্যতে; ইত্যলমতি বিস্তরেণ॥ এবং বিধবা বিবাহ নিবারণপক্ষে, সুস্পষ্ট নিষেধ বিধি দৃশ্যতে। যথা “ ঊঢ়ায়াঃ পুনরুদ্বাহং জ্যেষ্ঠাংশং গোবধস্তথা। কলৌপঞ্চনকুর্ব্বীত জ্যেষ্ঠ ভার্য্যাং কমণ্ডলু মিত্যাদিত্য পুরাণবচনং। “নতুনামাপিগৃহ্নীয়াৎ পত্যৌপ্রেতেপরস্যতু” নবিবাহ বিধাবুক্তং বিধবাবেদনং পুনরিতি মনুবচনং। দত্তায়াশ্চৈবকন্যায়াঃ পুনর্দ্দানং বরস্যচেত্যাদি বিধবা বিবাহ নিষেধক সুস্পষ্ট বচনানি যথাদৃশ্যন্তে; তথা বিধবা বিবাহপক্ষে স্পষ্টবিধির্নদৃশ্যতে। বিবাহিতা পুনর্ব্বিবাহপক্ষেঽপি যোবিধির্দৃশ্যতে। তত্র পতিগত বিবাহানর্হতা প্রযোজক ধর্ম্মবশাৎ তেনেদমায়াতং বিবাহিতায়া বিবাহাসিদ্ধৌ পাত্রান্তরেদানং তদপিযুগান্তরবিষয়ং। বিবাহিতায়া বিবাহসিদ্ধৌতু পত্যুর্জীবদ্দশায়াং মরণদশায়াম্বা পুনর্বিবাহবিধিঃ কিংতদ্বিবাহ প্রয়োজক দানবিধির্ব্বান দৃশ্যতে।

যত্তুচ্যতে বিবাহিতায়াঃ পত্যুর্মরণাদৌ পরাশরেণ পতিরন্যোবিধীয়তে ইত্যনেন পুনর্ব্বিবাহোবিহিত ইতি তদগ্রা-

ছং। এতদ্বচনস্য পুনর্ব্বিবাহ বিধায়কত্বে পূর্ব্বোক্ত নানা-বচন বিরোধঃ পূর্ব্বোক্ত যুক্তিবিরোধশ্চেতি দ্রষ্টব্যং। ইতি। অতোনিয়োগার্থকতয়া তদ্বচনং নির্ণীতং॥

পতিবিধায়কতয়া অষ্টৌবর্ষান্ প্রতীক্ষেতেতি নারদ-সংহিতাবচনং বাদিনাব্যাখ্যাতং তদযুক্তং। তৎকারণমু-চ্যতে প্রবাসিপতিস্থলে, অপ্রসূতাব্রাহ্মণী চতুরো বৎসরান্ প্রতীক্ষ্যান্যং সমাশ্রয়েৎ। প্রসূতা ব্রাহ্মণী অষ্টৌ বর্ষান্ প্রতীক্ষ্যান্যং সমাশ্রয়েদিত্যুক্তং প্রসূতা পদং অধ্যা-হার্য্যং। তত্র প্রতীক্ষণীয় কালানন্তরং পত্যন্তরগ্রহণে প্রবাসিপতেঃ সমাগমে, এক ভার্য্যায়াঃ ভোগেচ্ছয়া বিবাদ-প্রসঙ্গঃ। অত্র বচনে প্রসূতাপদেন প্রসূতপুত্রিকা ইতি যদিব-ক্তব্যং তদাপদভাবাদষ্টবর্ষানন্তরমন্যপতিগ্রহণং ন সম্ভবতি। অতঃ প্রসূতাশব্দস্য প্রসূতকন্যকা এবং ব্যাখ্যানং যুক্তং। নমুকুতস্তদযুক্তং ? প্রসূতকন্যকায়া অপি অসূতাবদ্বৈধ পুত্রাভাব-রূপাপদবতিষ্ঠতে, নৈবং প্রসূত কন্যকায়া দৌহিত্রোৎপাদন দ্বারা পারলৌকিকোপকার সম্ভবান্ন সম্পূর্ণাপদ্দৃশ্যতে। কিন্তু গৌণভাবেনোপকার সম্ভব স্তথাচ “দৌহিত্রোঽপিহ্য মুত্রৈনং সন্তারয়তিপৌত্রবৎ। তথা, দশপুত্রসমাকন্যা যানস্যাচ্ছী-লবর্জ্জিতা।” অতোঽসূতাপেক্ষয়াধিককাল প্রতীক্ষণং প্রসূ-তায়া উক্তং। কালবিশেষ প্রতীক্ষানন্তরং যদন্য পুরুষাশ্রয়-ণমুক্তং তদ্বৈধ পুত্রাভাব রূপাপন্নিবারণার্থং। এতন্নারদসং-হিতাবচনস্তু “ নষ্টে মৃতে ” ইতি পরাশর বচনে নষ্টপ-দোক্ত পতিপ্রবাসস্থলে ন পত্যন্তরমুদ্দেশমাত্রেণ নিয়োগঃ কল্প-

ণীয়ঃ। কিন্তু তন্ত্রোক্তকালবিশেষপ্রতীক্ষানন্তরমেব, অতঃ পরাশর বচনীয় বিশেষকং নারদ সংহিতাবচনং বাচ্যং। পরাশরবচনে আপচ্ছব্দেন বৈধপুত্রাভাবোবোদ্ধব্যঃ। অন্যথা পতিত পতৌ স্ত্রিয়াঃ কা আপৎ। অর্থাৎ পতিত-পতিনা পুত্রোৎপাদনং ভরণং রক্ষণঞ্চ সর্ব্বং,সম্ভবতি সত্যে-বং পতিতপতিস্থলে আপচ্ছব্দস্য বৈধ পুত্রাভাব পরতা-বাচ্যা। সুগমেননিয়োগেন পুত্রোৎপত্ত্যা আপদ্দূরীক-রণ সম্ভবে প্রবাসি পতিস্থলে বহুপ্রযত্নসাধ্য পুনর্ব্বিবাহ-বিধায়কেন বাদিসম্মতেন পতিরন্যোবিধীয়ত ইত্যনেন এক ভার্য্যায়াং ভোগেচ্ছা মূলক পতিদ্বয় সম্বন্ধি বিবাদ-প্রসক্তি নিরাকরণার্থং, যৎকস্যচিন্নির্যুক্তিকসমাধানং তৎ সর্ব্বথাহেয়ং, তৎ সমাধানঞ্চাষ্টবর্ষাদি প্রতীক্ষানন্তর মন্য-পতিকরণে পূর্ব্বপতে র্ভোগাধিকারো নাস্তীত্যেবং প্রকা-রং। মদুক্ত নিশেককারিবিধানে নবিবাদ প্রসক্তির্নবাত-দ্বিবাদভঞ্জনায় বহুবুদ্ধিসাধ্য স্ব সত্ত্বাস্পদীভূত পরিনীত স্ত্রী-করণক ভোগাধিকারাভাবরূপ সমাধানং করণীয়ং। বাদি-মতে অষ্টবর্ষাদি প্রতীক্ষানন্তরং অন্যপতিকরণে তস্মিন্ মৃতে যদি পূর্ব্বপতিরায়াতি তদা পরীনীত স্ত্রীসত্ত্বেঽপি বাদি মীমাংসিত ভোগাধিকারাভাবাৎ পুনর্ব্বিবাহ করণা-পত্তিঃ, তস্যাঃ পরিনীতস্ত্রিয়া অপি পুনর্ব্বিবাহাপত্তিঃ। পূর্ব্বপতি পরপত্যোরেকস্যাং ভার্য্যায়াং ভোগেচ্ছয়া রাজ-নিকটে ভোগাধিকার সম্পাদকাবেদনাপত্তিঃ আবেদনাভাবে পূর্ব্বপতের্বলিষ্ঠত্বে পূর্ব্বপতেরেব ভোগাধিকার সম্ভবঃ।

নিয়োগাবিবাদপক্ষে এতাবদনন্তদোষ লেশ দানস্পৃহাদেশ শঙ্কাক্লেশোঽপি নাস্তি। বাদিমতে অষ্টৌবর্ষান্ প্রতীক্ষেতেতি নারদবচনে পরতোঽন্যং সমাশ্রয়েদিত্যস্য পুত্রোৎ-পাদনার্থং পরতোঽপ্রসূতা চতুর্ব্বর্ষানন্তরং প্রসূতা অষ্ট-বর্ষানন্তরং অন্যং সমাশ্রয়েদিতি যথা শ্রুত্বার্থ এব নসঙ্গচ্ছতে। অস্মম্মতেতু যথাশ্রুতার্থএব সঙ্গচ্ছতে। নতুবাদি বদন্যং বিবাহকর্ত্তারং সমাশ্রয়েৎ পতিত্বেন জানীয়াদিতি কষ্টসাধ্য ব্যাখ্যানং নাপদ্যতে॥

ইদানীং নষ্টেমৃতে ইতি বচনং ন বিশেষ বিধিজ্ঞাপকং কলিশব্দাভাবাৎ যদিচোচ্যতে কলিশব্দাভাবেঽপিকলৌ-পারাশরঃস্মৃত ইতি সঙ্কেতাৎ কলিশব্দাকর্ষনাৎ অবিদ্যমান-স্যাপি কালশব্দস্য আদিপুরাণস্থ কলিশব্দবৎ বিদ্যমানতা চেতিচেন্ন, কলৌপারাশরস্মৃতঃ ইত্যনেনোত্তরোত্তরত্র কলি-শব্দস্যাকর্ষনা সম্ভবাৎ অন্যথা দ্বিতীয়াধ্যায়ে কলিকালীন গৃহস্থধর্ম্মবর্ণনার্থং অতঃপরং গৃহস্থস্য ধর্ম্মাচারং কলৌযুগে, ইত্যত্র কলিশব্দোপাদানংকুতঃকৃতং যেনচ পুনরুপাদানেন স্বকৃতসঙ্কেতে অনাস্থা কলিশব্দস্য পুনরুক্তিশ্চ জায়তে। যথাকথঞ্চিৎ কলিশব্দস্য বিদ্যমানতা স্বীকারেঽপি সঙ্কেতা-কর্ষিত কলিশব্দাপেক্ষয়া বাক্যাত্ প্রতিয়মানস্য আদিপুরাণ বচনীয় কলিশব্দস্য বিদ্যমানতা ঘটিত বিধের্বলবত্বংযুক্তং! অস্তুবাদ্বয়োঃ কলিশব্দয়োর্ব্বিধিদ্বয় ঘটকত্বং তথাপি পরাশর বচনং নবিশেষ বিধিজ্ঞাপকং আপদ্বিশেষণীভূত পঞ্চসংখ্যায়া অবিবক্ষনাৎ পতিগতা পত্সামান্যে অন্য পতি প্রতি-

পাদনাৎ পঞ্চসংখ্যায়া বিবক্ষায়াঞ্চতাৎপর্য্যবাধঃস্যাৎ অতস্তাৎপর্য্যবাধং স্বীকৃত্য গৌরবগ্রস্ত কলিশব্দাঘটিত নষ্টে মৃত ইত্যাদি পরাশর বিধের্ব্বিশেষ বিধিত্ববর্ণনং সর্ব্বথাহেয়মিতি সুধীভির্ভাব্যং। ইদানীং কলৌপারাশরঃ স্মৃত ইত্যস্য তাৎপর্য্যং বাদিনা যথা বর্ণিতং তন্নযুক্তং। বাদীসম্মত পরাশর তদ্বচন তাৎপর্য্যন্তু যথা পরাশরো যৎ২ ধর্ম্মং প্রতিপাদয়িষ্যতি তৎসর্ব্বং কলিকালীনং এবং তাৎপর্য্যঞ্চেৎ তদা-তৃতীয়াধ্যায়াদৌ যুগান্তরীয় ধর্ম্ম বর্ণনং পরাশরেণ কথঞ্চিদপি প্রতিপাদিতং নস্যাৎ। বস্তুতঃ কলৌ পারাশরঃস্মৃত ইত্যস্যতু এবং তাৎপর্য্যং বর্ণয়িতুং যুক্তং। সর্ব্বেষাং ধর্ম্ম বক্তৄণাং মধ্যে মন্বাদি পরাশরান্ত ব্যক্তি চতুষ্টয়স্য যুগ বিশেষীয় ধর্ম্ম বিশেষ নিরুপকত্বং, দৃশ্যতেচ পরাশর সংহিতায়াং প্রথমাধ্যায়ে কলি বিশেষ বর্ণনং। অতশ্চতুর্যুগ ধর্ম্মজ্ঞাপক তৃতীয়াধ্যায়াদৌ বিহিতশ্চতুর্যুগ ধর্ম্মোদৃশ্যতে নতু কলিমাত্রীয়ো ধর্ম্মঃ। নষ্টে মৃত ইতি বচনাত্ প্রাক্ পশ্চাদপি চতুর্যুগ সাধারণ ধর্ম্ম বর্ণনং দৃশ্যতে; তেন নষ্টে মৃত ইতি বচনং ন কলিকালীন পত্যন্তর বিধায়কং প্রত্যুতঃ কলৌ তদ্বিশেষ নিষেধাত্ যুগান্তরীয় পত্যন্তর বিধায়কং মহামহোপাধ্যায়েন পরাশর ভাষ্যকারেণ মাধবাচার্য্যেনোক্তং তদ্যুক্তমুক্তং যতো নষ্টে মৃত ইতি বচনাৎ প্রাক্ বৈধব্য কারণ যুক্ত্যা নিয়োগাদি পরিবেদন দোষ তৎপ্রায়শ্চিত্তান্ত সাধারণ ধর্ম্মোনির্দ্দিষ্টঃ। নষ্টে মৃত ইতি বচনে পঞ্চসংখ্যায়া অবিবক্ষায়াং দৃষ্টান্তমাহ। যথা দশ গৃহাণ গৃহ্লাতি

ইত্যুক্ত্বা গৃহং সংমার্ষ্টি ইত্যত্র তাৎপর্য্যবাধবশাৎ গৃহগতৈ-
কত্ব সংখ্যা যথা অবিবক্ষিতা তথা প্রকৃতেঽপি পঞ্চসংখ্যায়া
অবিবক্ষিতত্বং যুক্তং ॥ নষ্টে মৃতে ইতি বচনে, পঞ্চসু আপ-
ৎসু ইতি কথং লিখিতং। পতৌনষ্টে, মৃতে, প্রব্রজিতে,
ক্লীবে পতিতেচসতি, অন্যপতির্বিধীয়তে ইত্যনেন বক্ত-
ব্যস্য অভিপ্রায়স্য প্রকাশাৎ। ইদানীং পঞ্চসু আপৎসু
ইত্যস্য যাদৃগ্ব্যাখ্যানেন তাৎপর্য্যং প্রকাশতে তথাব্যাখ্যা-
য়তে পতৌপঞ্চসু আপৎসু অর্থাৎ পতিগতা আপদেব
অন্যপতি করণেহেতুঃ। আপচ্ছব্দস্যতুবৈধপুত্রাভাব পর-
তাবাচ্যা; তেন ইদমেব জ্ঞাপ্যতে যত্র পতিগতাপৎ
বিদ্যতে অর্থাৎ বৈধপুত্রাভাবপ্রযোজক মরণাদিকং বিদ্যতে
তত্র অন্যপতিঃ কর্ত্তব্যঃ। যদ্যেবং তাৎপর্য্যং পরাশরস্য
তদাপঞ্চাপৎবিশেষণীভূত পঞ্চসংখ্যায়া নিস্ফলত্বং প্রতি-
ভাতি। নিস্ফলত্বেচ তত্রবিবক্ষা অনুপযুক্তা, সত্যেবং
যেন পত্যাসহস্ত্রিয়া বিবাহোজাতস্মিন্ পত্যৌ যদি
বৈধপুত্রোৎপত্তি প্রতিবন্ধকং পরাশরোক্ত সগোত্রত্ব
চিররোগিত্বাদিকং বর্ত্ততে তদপি অন্যপতি করণে হেতুর-
বগম্যতে। তেনৈতৎ ফলতি যত্র বিবাহকর্ত্তা যদি সগোত্র
চিররোগিপ্রভৃতির্ভবতি তদাপি অন্যপতিকরণং সমুচিতং।
তৎপতিগতবৈধপুত্রাভাবহেতুভূত ধর্ম্মোপস্থিতৌ ত্বদীয়
ভার্য্যা পাত্রান্তরেদেয়া। ইতি যৎকাত্যায়নসংহিতাদি-
বচনেন পতিগত দোষবশাৎ বিবাহিতায়াঃ পুনর্দ্দানং
তৎযুগান্তর বিষয়ং। কলৌও পতিগত দোষবশাৎ

বিবাহিতায়াঃ পুনর্দ্দানং আদিপুরাণ বচনাদিনাসুস্পষ্ট-তয়া নিষিদ্ধং। পঞ্চস্থ আপৎসু ইত্যত্র বিদ্যাসাগরেণ-তুতৎ পরাশর বচনস্য কৌশলেন অভিপ্রায়ং বর্ণয়িত্বা পঞ্চাপৎস্থলে বিবাহিতা কন্যাবপি দেয়েতি সিদ্ধান্তঃ প্রকা-শিতঃ, সতুমীমাংসকানাং মাধবাচার্য্য, কুল্লুকভট্ট, স্মার্ত্ত ভট্টাচার্য্যাদীনাং রীতি বিরুদ্ধঃ। যুক্ত্যাশাস্ত্রতাৎপর্য্যং নির্ণেতব্যং। যথাকাকেভ্যোদধিরক্ষতাং ইতি প্রযুক্তে রক্ষবেন কিং কাকমাত্রাৎ দধিরক্ষণং করণীয়ং কিম্বা যথা কথঞ্চিৎ দধিরক্ষামেব আবশ্যকং ইতি বক্তুরভি-প্রায়ং জ্ঞাত্বা শ্বশৃগালাদিভ্যোপিরক্ষণং ক্রিয়তে তত্র দধি-রক্ষাবশ্যকতা রূপ যুক্তিবশাৎ কাকশব্দস্য দধি বিনা-শক প্রাণীপরতাং স্বীকৃত্য কাকশব্দেন কাকমাত্রং, ন জ্ঞা-য়তে তথা প্রকৃতেপিপত্যুর্বৈধপুত্রোৎপাদন প্রতিবন্ধক ধর্ম্মোপস্থিতি রূপকারণ সত্বে পত্যন্তরকরণমাবশ্যক মিতি পরাশরীয়াভিপ্রায়ং পর্য্যালোচ্য আপদংশে পঞ্চ-সংখ্যা ন বক্তুমিষ্টা ইতি যুক্তিবশাৎ সগোত্র চির-রোগি প্রভৃতি পতিস্থলেপি পত্যন্তরকরণং আয়াতি; অর্থাৎ যথা পঞ্চাপৎস্থলে বিবাহ প্রয়োজনং যৎপুত্রপ্রাপ্তি-স্তন্ন সিদ্ধতি। তথা সগোত্র চিররোগি প্রভৃতিস্থলেপি পুত্র-লাভ প্রয়োজন বিরহাৎ পত্যন্তরকরণং সমুচিতং ইতি যুক্তির্যস্যাহৃদি দেদীপ্যমানা সকথং পঞ্চসংখ্যায়া বক্তু মিষ্টত্বং জ্ঞাত্বা পঞ্চসংখ্যাঘটিত বিদ্যাসাগরকৃত মীমাং-সায়াং শ্রদ্দধাতিন কথঞ্চিদপি। সমান কারণ জ্ঞানে অন্য-

স্যাপি গ্রহণে দৃষ্টান্তোদীয়তে। অন্নপাকস্থলে পক্তা একস্য অন্নস্যকর মৰ্দ্দনাদিনা সুপক্কত্বং নিশ্চিত্য সর্ব্বেষাং তৎস্থালিস্থিতানাং অন্নানাং সুপক্কত্বং নিশ্চিনোতি। তথা প্রকৃতেপি বিবাহস্থলে যত্র২ পুত্রোৎপাদনরূপ প্রয়োজনাভাবো জায়তে তত্র২ অন্য পতিকরণং পরাশরাভিপ্রেতং ইতি যুক্তির্যস্য দৃষ্টিগোচরা সকথং বিদ্যাসাগর মীমাংসাং হৃদয়ে স্থাপয়তি অন্য পতি করণঞ্চ যুগান্তরেস্থিতং তৎ মাধবাচার্য্যেণ স্পষ্টতয়া লিখিতং ময়াতু পরাশর বচনং নিয়োগার্থকং নির্ণীতং তেনচ কলৌ অন্য পতিকরণং নিয়োজনঞ্চ কলৌ নিষিদ্ধং সুতরাং কলৌ বিধবা ব্রহ্মচর্য্যং সহ মরণং বা এতয়োরেকমেব অনুতিষ্ঠেৎ ন বিদ্যাসাগর সম্মতং পত্যন্তরং সমাশ্রয়েৎ পুনঃ নষ্টে মৃতে, প্রব্রজিতে, ইত্যাদিকং ন প্রয়োজনং অর্থাৎ ন বক্তুমিষ্টং কেবলাসু আপৎসু অন্য পতি করণ নিযোজনঞ্চ বিধীয়তে এতন্মাত্রেণৈব বক্তব্যস্য প্রকাশাৎ অতোনষ্ট পতিতাদি পতিঘটিত পত্যন্তর করণ বিষয়ক পরাশর বিধির্ন বক্তব্য পরাশর বিধেরাকারস্তু আপদি নারীণাং অন্য পতি র্বিধীয়তে ইত্যেবং রূপ।

তথাসতি ন পরাশর বিধের্গৌরবং আয়াতি লাঘবাদি নানাবিধ যুক্তি সম্মত পরাশর বিধিঃ সম্ভবতি। এবং অন্য পতি র্বিধীয়তে ইত্যত্র অন্য বিশেষণং ব্যার্থং অর্থাৎ ক্লীবেচ পতিতে পতৌ ইত্যনেন পতিসত্বে পতিবিধানে অন্য পতিরেব বিধীয়তে ইতি আয়াতি কিং অন্য বিশেষণস্য

প্রয়োজনং তদুচ্যতে পঞ্চস্থ আপৎসু অন্য নষ্ট পতিতাদি ভিন্ন অর্থাৎ বৈধপুত্রোৎপাদন যোগ্য পতির্বিধীয়তে অন্য শব্দস্য পূর্ব্বপতিভিন্নতয়া চিররোগী সগোত্রাদিরূপ পত্যন্তরকরণে প্রয়োজনা সিদ্ধা পরাশর বিধেনৈষ্ফল্যং জায়তে।

# বিজ্ঞাপন।

"শরীর-রক্ষা" নামক একখানি অত্যুৎকৃষ্ট আয়ুর্ব্বেদীয় মতের অভিনব গ্রন্থ স্বল্পমূল্যে কলিকাতার প্রধান প্রধান পুস্তকালয়ে বিক্রয়ার্থ প্রস্তুত আছে। বঙ্গবাসী মাত্রেরই ইহা গৃহ পঞ্জিকার ন্যায় এক ২ খানি ঘরে রাখা উচিত। মূল্য স্থলভ। ।০ আনা মাত্র। যাঁহারা অধিক সংখ্যক পুস্তক ক্রয় করিবেন তাঁহারা শতকরা ১৬ টাকার হিসাবে কমিসন পাইতে পারেন।

---

এই শান্তিপুর হিতকরী-যন্ত্রে নানাবিধ ইংরাজি ও বাঙ্গালা অক্ষরে মুদ্রণকার্য্য সুচারুরূপে সত্বরে সম্পন্ন হইয়া থাকে ও আমরা কলিকাতার দরে কার্য্য দিয়া থাকি, এখানে বাঁধাই কাজও হয়।

শ্রীভুবনমোহন চট্টোপাধ্যায়।

ম্যানেজার।